UNIVERSITY OF CAMBRIDGE

EXAMINATION IN ASIAN AND MIDDLE EASTERN STUDIES FOR THE DEGREE OF MASTER OF PHILOSOPHY

1-Year MPhil in Sanskrit and South Asian Studies

---

Friday 4 June 2010 09.00 – 12.00

---

# SA.3 TEXTS IN CONTEXT: VEDANTA AND ITS SOURCES

Answer **ALL** questions.

**STATIONERY REQUIREMENTS**
*20 Page Answer Book x 1*
*Rough Work Pad*

**SPECIAL REQUIREMENTS**
*None*

**You may not start to read the questions printed on the subsequent pages of this question paper until instructed that you may do so by the Invigilator.**

1 (a) Translate into English [20 marks]:

अस्य सोम्य महतो वृक्षस्य यो मूलेऽभ्याहन्याज्जीवन् स्रवेद्यो मध्येऽभ्याहन्याज्जीवन् स्रवेद्योऽग्रेऽभ्याहन्याज्जीवन् स्रवेत् । स एष जीवेनाऽऽत्मनाऽनु[a]प्रभूतः पेपीयमानो मोदमानस्तिष्ठति ॥ १ ॥

*a*) ऋ 7·77·3 चित्रामघा विश्वमनु प्रभूता; 8·58·2 एकः सूर्यो विश्वमनु प्रभूतः; शब्रा 10·6·3·2 सर्वा अनु दिशः प्रभूतम्.

अस्य यदेकाꣳ शाखां जीवो जहात्यथ सा शुष्यति । द्वितीयां जहात्यथ सा शुष्यति । तृतीयां जहात्यथ सा शुष्यति । सर्वं जहाति सर्वः शुष्यति ॥ २ ॥

एवमेव खलु सोम्य विद्धीति होवाच । जीवा[a]पेतं वाव किलेदं म्रियते न जीवो म्रियत इति । स य एषोऽणिमैतदात्म्यमिदꣳ सर्वम् । तत्सत्यम् । स आत्मा । तत्त्वमसि श्वेतकेतो इति । भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्येति होवाच ॥ ३ ॥

*a*) Plato, *Phaedon* 52–54.

॥ इति एकादशः खण्डः ॥

---

न्य[a]ग्रोधफलमत[b] आहरेति । इदं भगव इति । भिन्द्धीति । भिन्नं भगव इति । किमत्र पश्यसीति । अण्व्य इवेमा धाना भगव इति । आसामङ्गैकां भिन्द्धीति । भिन्ना भगव इति । किमत्र पश्यसीति । न किंचन भगव इति ॥ १ ॥

तꣳ होवाच — यं वै सोम्यैतमणिमानं न नि[a]भालयस एतस्य वै सोम्यैषोऽणिम्न एवं महान्यग्रोधस्तिष्ठति । श्रद्ध[b]त्स्व सोम्येति ॥ २ ॥

*a*) छां 6·13·2. —*b*) ऋ 2·12·5 श्रदस्मै धत्त; cp श्रद्धा कामायनी as the ऋषि of the सूक्त 10·151; पा 1·4·66 कणेमनसी श्रद्धाप्रतीघाते; 5·2·101 प्रज्ञाश्रद्धार्चाभ्यो णः.

स य एषोऽणिमैतदात्म्यमिदꣳ सर्वम् । तत्सत्यम् । स आत्मा । तत्त्वमसि श्वेतकेतो इति । भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्येति होवाच ॥ ३ ॥

॥ इति द्वादशः खण्डः ॥

लवणमेतदुदकेऽवधायाथ मा प्रातरुपसीदथा इति । स ह तथा चकार । तं होवाच । यद्दोषा[a] लवणमुदकेऽवाधा अङ्ग तदाहरेति । तद्धावमृश्य[b] न विवेद ॥ १ ॥

*a*) ऋ 2·8·3 दोषोषसि प्रशस्यसे; अ 6·1·1 दोषो गाय बृहद्गाय. —*b*) अ 7·64·2 इदं यत्कृष्णः शकुनिरवामृक्षत्; तैसं 3·2·6·1 यत्कृष्णशकुनः पृषदाज्यमवमृशेत्, शूद्रा अस्य प्रमायुकाः स्युः.

यथा विलीनमेव । अङ्गास्यान्ताद्[a]ाचामेति । कथमिति । लवणमिति । मध्यादाचामेति । कथमिति । लवणमिति । अन्तादाचामेति । कथमिति । लवणमिति । अभिप्रास्यैतदथ[b][1] मोपसीदथा इति । तद्ध तथा चकार । तच्छश्वत्संवर्तते[2] । तं होवाचात्र वाव किल तत्सोम्य न निभालयसेऽत्रैव किलेति ॥ २ ॥

स य एषोऽणिमैतदात्म्यमिदं सर्वम् । तत्सत्यम् । स आत्मा । तत्त्वमसि श्वेतकेतो इति । भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्येति होवाच ॥ ३ ॥

*Chāndogya Upaniṣad* 6.11-13

(b) Comment grammatically on the forms *vijñāpayatu* and *binddhi*, and on the syntax of the expression *tat tvam asi*, occurring in the above passage. [10 marks]

**2** (a) Translate into English [20 marks]:

प्लवा[a] ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं[b] येषु कर्म ।  
एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापियन्ति ॥ ७ ॥

*a*) ऋ 1·182·5 युवमेतं चक्रथुः सिन्धुषु प्लवम्; अ 12·2·48. —*b*) मुं 1·1·5 : Four Vedas × 3 ( संहिता + ब्राह्मण + सूत्र ) = 12 + six Vedāṅgas = 18 ?

अविद्यायामन्तरे[a] वर्तमानाः स्वयंधीराः पण्डितंमन्यमानाः ।  
जङ्घन्यमानाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः ॥ ८ ॥

*a*) क 2·5; मै 7·9.

अविद्यायां बहुधा वर्तमाना वयं कृतार्था[a] इत्यभिमन्यन्ति बालाः ।  
यत्कर्मिणो न प्रवेदयन्ति रागात् तेनातुराः[b] क्षीणलोकाश्च्यवन्ते ॥ ९ ॥

(TURN OVER

इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः ।
नाकस्य पृष्ठे ते[1] सुकृतेऽनुभूत्वा[2] इमं लोकं हीनतरं वा[1] विशन्ति ॥ १० ॥
तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्षचर्यां चरन्तः ।
सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा ॥ ११ ॥
परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन ।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥ १२ ॥
तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥ १३ ॥

*Muṇḍaka Upaniṣad* 1.2.7-13

(b) Comment grammatically on the forms *jaṅghanyamānāḥ*, *anubhūtvā* and *samitpāṇiḥ*, occurring in the above passage. [10 marks]

**3** (a) Translate into English [20 marks]:

महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषां लोक इमाः प्रजाः ॥ १०-६ ॥
एतां विभूतिं योगं च मम यो वेत्ति तत्त्वतः ।
सोऽविकम्पेन योगेन युज्यते नात्र संशयः ॥ १०-७ ॥
अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते ।
इति मत्वा भजन्ते मां बुधा भावसमन्विताः ॥ १०-८ ॥
मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥ १०-९ ॥
तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ १०-१० ॥
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥ १०-११ ॥

*Bhagavadgītā* 10.6-11